# तृतीयस्कंध परिच्छेदः
# 8 – अथ अष्टम दशकम्
# ॥ प्रलयानंतर जगत्सृष्टिः ॥

एवं तावत्प्राकृतप्रक्षयान्ते ब्राह्मे कल्पे ह्यादिमे लब्धजन्मा ।
ब्रह्मा भूयस्त्वत्त एवाप्य वेदान् सृष्टिं चक्रे पूर्वकल्पोपमानाम् ॥ (8.1)

सोऽयं चतुर्युग सहस्रमितान्यहानि तावन्मिताश्च रजनीर्बहुशो निनाय ।
निद्रात्यसौ त्वयि निलीय समं स्वसृष्टैः नैमित्तिकप्रलयमाहुरतोऽस्य रात्रिम् ॥
(8.2)

अस्मादृशां पुनरहर्मुखकृत्यतुल्यां सृष्टिं करोत्यनुदिनं स भवत्प्रसादात् ।
प्राग्ब्राह्मकल्पजनुषां च परायुषां तु सुप्तप्रबोधनसमाऽस्ति तदाऽपि सृष्टिः ॥
(8.3)

पंचाशदब्दमधुना स्ववयोऽर्धरूपं एकं परार्धमतिवृत्य हि वर्ततेऽसौ ।
तत्रान्त्यरात्रि जनितान् कथयामि भूमन्! पश्चाद्दिनावतरणे च भवद्विलासान्॥
(8.4)

दिनावसानेऽथ सरोजयोनिः सुषुप्तिकामस्त्वयि सन्निलिल्ये ।
जगन्ति च त्वज्जठरं समीयुस्तदेदमेकार्णवमास विश्वम् ॥ (8.5)

तवैव वेषे फणिराजिशेषे जलैकशेषे भुवने स्म शेषे ।
आनंदसांद्रानुभवस्वरूपः स्वयोगनिद्रा परिमुद्रितात्मा ॥ (8.6)

कालाख्यशक्तिं प्रलयावसाने प्रबोधयेत्यादिशता किलादौ ।
त्वया प्रसुप्तं परिसुप्तशक्तिव्रजेन तत्राखिलजीवधाम्ना ॥ (8.7)

चतुर्युगाणां च सहस्रमेवं त्वयि प्रसुप्ते पुनरद्वितीये ।
कालाख्यशक्तिः प्रथमप्रबुद्धा प्राबोधयत्त्वां किल विश्वनाथ! ॥ (8.8)

विबुध्य च त्वं जलगर्भशायिन्! विलोक्य लोकानखिलान्प्रलीनान् ।
तेष्वेव सूक्ष्मात्मतयानिजान्तःस्थितेषु विश्वेषु ददाथ दृष्टिम् ॥ (8.9)

ततस्त्वदीयादयि! नाभिरन्ध्रादुदंचितं किंचन दिव्यपद्मम् ।
निलीननिश्शेषपदार्थमाला संक्षेपरूपं मुकुलायमानम् ॥ (8.10)

तदेतदंभोरुहकुड्मलं ते कलेवरात्तोयपथे प्ररूढम् ।
बहिर्निरीतं परितस्फुरद्भिः स्वधामभिर्ध्वान्तमलं न्यकृन्तत् ॥ (8.11)

संफुल्लपत्रे नितरां विचित्रे तस्मिन् भवद्वीर्य धृते सरोजे ।
स पद्मजन्मा विधिराविरासीत् स्वयंप्रबुद्धाखिलवेदराशिः ॥ (8.12)

अस्मिन् परात्मन् ननु पाद्मकल्पे त्वमित्थमुत्थापितपद्मयोनिः ।
अनंतभूमा मम रोगराशिं निरुन्धि वातालयवास! विष्णो! ॥ (8.13)

॥ इति प्रलयानंतर जगत्सृष्टिः अष्टम दशकम् संपूर्णम् ॥